**अण्णमुख** ( aṇṇamukha ) *m.* name of a person अण्णमुखमालोक्य मयूरो वाक्यमब्रवीत् ParamāKā. 37. 15.

**अण्णलैअ** ( aṇṇalaia ) *m.* name of a person ता(? त)था व(ब)ह्वृचशाखाय अण्णलैआय EI. ii. 220. 76.

**अण्णाजि** ( aṇṇāji ) *m.* name of a person अत्रैकामश्नुते वृत्तिमंणाजिभा(भ)र्गवान्वय: EI. xii. 184. 310; अधर्मः पण्डितंमन्यमण्णाजिं विशतु ParamāKā. 50. 121.

**अण्णादीक्षित** ( aṇṇā-dīkṣita ) *m.* name of an author [nt.]

**अण्णिग** ( aṇṇiga ) *m.* name of a king परिमलिताण्णिगपल्लवविपत्तिरासीन्न विस्मयस्थानम् EI. iv. 284. 42.

**अण्त्व** ( aṇ-tva ) *n.* the state of being the Pratyāhāra *aṇ* एवं च रूपाश्रयोऽयं विधिरिति ताद्रूप्यानतिदेशादण्त्वाभावाद्ध्रस्वाभाव: Pradī. vi. 246. 15 (*on* vii. 4. 23); उकालो( ऽच् ) ह्रस्व इति वाक्येऽण्त्वात्सवर्णग्रहणे LaS'abdeS'e. i. 23. 12.

**अण्दर्शन** (aṇ-darśana) *n.* presence (*lit.* appearance) of the *taddhita* suffix *aṇ* तत्राण्दर्शनमात्रकृतं सादृश्यमाश्रीयते Pradī. iv. 283B. 37 (*on* v. 1. 97)

**अण्निमित्तक** ( aṇnimitta-ka ) *adj.* caused by the *taddhita* suffix *aṇ*, occasioned by *aṇ* अण्निमित्तकाल्लोपस्तु व्याश्रयत्वान्नासिद्ध: LaS'abdeS'e. i. 395. 14.

**अण्निरूपित** ( aṇ-nirūpita ) *adj.* pointed out or ascertained by the *taddhita* suffix *aṇ* सपत्नशब्दस्य भाष्यतोऽण्निरूपितप्रकृत्यन्तरत्वमेव लभ्यते LaS'abdeS'e. ii. 99. 2.

**अण्प्रकरण** (aṇ-prakaraṇa) *n.* section dealing with the *taddhita* suffix *aṇ* अण्प्रकरणेऽग्निपदादिभ्य उपसंख्यानम् Vār. 1 (*on* v. 1. 97); MahāBh. ii. 362. 3 (*on* v. 1. 97); अण्प्रकरणे श्रोत्रियस्य घलोपश्च Vār. 1 (*on* v. 1. 130); MahāBh. ii. 371. 9 (*on* v. 1. 131); अण्प्रकरणे ज्योत्स्नादिभ्य उपसंख्यानम् Vār. 2 (*on* v. 2. 103); MahāBh. ii. 397. 2 (*on* v. 2. 103); अण्प्रकरणे कुलालवरुडनिषादचण्डालामित्रेभ्यश्छन्दसि Vār. 1 (*on* v. 4. 36); MahāBh. ii. 435. 8 (*on* v. 4. 36); अण्प्रकरणादृकारस्याप्राप्ति: Vār. 1 (*on* vi. 4. 2); MahāBh. iii. 181. 2 (*on* vi. 4. 2)

**अण्प्रत्यय** ( aṇ-pratyaya ) *m.* **i** the *kṛt* suffix *aṇ* व्याप्त्यर्थादक्षतेर्धातोः पुष्करोपपदादण्प्रत्यये पुष्कराक्षः ViṣṇuSaBh. 89. 10 (*on* 72); कर्मण्युपपदे धातुमात्रादण्प्रत्ययो भवति NyāyMañ. i. 382. 2; अर्थापेक्षायां तु सप्तम्यामण्प्रत्ययस्याभिधेयं कर्म स्यात् Pradī. iii. 133B. 23 (*on* iii. 1. 92); iii. 213B. 21 (*on* iii. 2. 188); कर्तृवचनस्त्वण्प्रत्यय: सह कामयतिनानुवाद: NyāyRaMā. 161. 7; उपासनाशब्दो नाण्प्रत्ययान्त: । येन स्त्रियां ङीबन्त: स्यात् Aparā. 891. 8 (*on* 3. 17); कर्मोपपदाद्धातुमात्रादण्प्रत्यये कृते ··· बहूनां शब्दानामनुशासनमुपलभ्यते SarvaDaSaṁ. 13. 77; कप्रत्ययेनाण्प्रत्ययस्य बाधनं भवति PariVṛ.(Sī.) 76. 15; **ii** *taddhita* suffix *aṇ* तस्येदमिति संबन्धमात्रेऽपि चाण्प्रत्ययस्मरणात् ĀgaPrā. 75. 16; वृद्धसंज्ञानां शरादिगणान्तगतानां च मयडेव, नाण्प्रत्यय इत्यपवदति S'rutaPra. i. 226. 30 (*on* i. 1. 13); ii. 209. 24 (*on* ii. 1. 1); 'तस्येदम्' (P. 4. 3. 120) इत्यण्प्रत्यय: ManvaMu. 7. 17 (*on* 1. 10); अष्टाकपालप्रातिपदिकात्संस्कृतमित्यर्थे विहितस्याण्प्रत्ययस्य ··· लुक्स्मरणात् VidhiRa. 9 (58. 5); 'तस्येदम्'इति संबन्धसामान्ये अण्प्रत्ययविधानात् S'ivārkaMaDī. i. 75. 11 (*on* i. 1. 1); अष्टसु कपालेषु संस्कृतमित्यस्मिन्नर्थे विहितस्य तद्धितरूपस्याण्प्रत्ययस्य MīmāKau. i. 258. 3 (*on* i. 4. 17); पूर्वं तु 'तत्र भव:' इति अण्प्रत्ययो विहित: Bhāsk. ii. 218. 10 (*on* iii. 1. 2); कूटिन्शब्दादण्प्रत्ययविभक्त्यो: प्राप्तयो: LaS'abdeS'e. i. 175. 15; ii. 310. 2; 'तस्येदम्' इति शास्त्रेण तादृशेऽर्थेऽण्प्रत्ययान्तस्यैव वा साधुत्वनियमात् VaiyāSiMañ. 134. 4.

**अण्प्रत्याहार** ( aṇ-pratyāhāra ) *m.* Pratyāhāra called *aṇ* **i** (including the vowels *a, i, u*) अण्प्रत्याहारे ऋकारस्यानन्तर्भावात् ··· ऋकारस्य अच्त्वं नास्ति PariVṛ.(Sī.) 3. 15; **ii** (including the vowels, semivowels and *h*) व्याकरणतन्त्रे चतुर्दशाक्षरोऽयं परणकारेणाण्प्रत्याहार: SetuBa. 325. 20.

**अण्प्रसङ्ग** ( aṇ-prasaṅga ) *m.* contingency of the *taddhita* suffix *aṇ* न च 'तदधीते' इत्यण्प्रसङ्गो, वैकल्पिकत्वात् LaS'abdeS'e. i. 534. 19.

**अण्बाधक** ( aṇ-bādhaka ) *adj.* which sets aside the suffix *aṇ* अण्ग्रहणमुदपानादण्बाधकस्योत्साद्यञो बाधनार्थम् Prasā. i. 775. 21; लिप्यर्थकोऽत्र ङीप् 'तस्येदम्' इत्यण्बाधक इति बहव: LaS'abdeS'e. i. 401. 7.

**अण्बाधनार्थ** ( aṇbādhanārtha ) *adj.* meant for prevention of the suffix *aṇ* तेन ज्ञापनस्य प्रयोजनाभावादण्बाधनार्थमेवेदं वक्तव्यम् Pradī. iii. 159A. 15 (*on* iii. 2. 1); मत्वर्थीयेनैव सिद्धेऽण्बाधनार्थमिदम् SiddhāKau. 246A. 9; 497B. 2.

**अण्मणंगुरु** ( aṇmaṇaṅguru ) *m.* name of a village अण्मणंगुरुन[ा]मग्र[ा]मे दक्षिणदिग्भागे EI. xviii. 232. 52; xviii. 232. 59.

**अण्य** ( a-ṇya ) (Gr.) absence of the (meaning of) *ṇya* (Potential Pass. Part.) तेऽण्ये JaineVyā. iv. 4. 59 = P. ण्यत् iii. 1. 124.

**अण्यदर्थ** ( a-ṇyadartha ) *m.* other than the meaning conveyed by *ṇyat* निष्ठायामण्यदर्थे P. vi. 4. 60.

**अण्यन्त** ( a-ṇyanta ) *adj.* not ending in the causal suffix *ṇi* युतान्यण्यन्तानाम् PhiṭSū. 56; णेरात्मनेपदविधानेऽण्यन्तस्य कर्मणस्तत्रोपलब्धि: Vār. 1 (*on* i. 3. 67); शब्दकर्मकाणामकर्मकाणां च अण्यन्तानां य: कर्त्ता KāśiVṛ. (*on* i. 4. 52); न च तेषामण्यन्तानामशक्तिरिति TantrVā. 344. 15 (*on* ii. 1. 1); अण्यन्तस्य तु शिश्वयिषति PrakriKau. ii. 328. 7; अत्राण्यन्तस्य गत्यर्थस्य गमेर्धातोः स्वर्गं गच्छन्त: शत्रव: कर्तार: Prasā. i. 393. 5; ii. 691. 14; अण्यन्तादपि रगित्याहु: LalitāSaBh. 80. 16 (*on* 115); नन्वण्यन्ततत्प्रकृतिकल्युडन्तेनादनीयवस्तुनो भोजनार्थं भोजनपात्रे निक्षेपोऽप्युच्यते LaS'abdeS'e. ii. 600. 4; VaiyāBhū. 39. 12.

**अण्यन्तकर्तृ** ( aṇyanta-kartṛ ) *m.* agent of the non-causal verbal root नियमविधित्वपक्षे लभेरण्यन्तकर्तु: कर्मत्वस्य व्यावर्तनात् RasGaṅ. 606. 9.

**अण्यन्तापेक्षा** ( aṇyantāpekṣā ) *f.* comparison with or reference to the verb not ending with the causal suffix *ṇi* अण्यन्तापेक्षयोक्तमुत्तरार्थमित्येके PariVṛ.(Sī.) 4. 19.

**अण्यन्तार्थ** ( aṇyantārtha ) *adj.* intended for the verb not ending in the causal suffix *ṇi* अण्यन्तार्थं च भूषाग्रहणम् Pradī. iii. 124B. 37 (*on* iii. 1. 87)

**अण्यन्तावस्था** ( aṇyantāvasthā ) *f.* non-causal state, situation of not ending with the suffix *ṇi* क्रियापि च सर्वेष्वेतेषूदाहरणेषु यैवाण्यन्तावस्थायां सैव ण्यन्तेऽपि Nyās. i. 244. 21 (*on* i. 3. 67)

**अण्यन्तावस्थात्व** ( aṇyantāvasthā-tva ) *n.* the nature of the state of not having *ṇi* at its end अण्यन्तावस्थात्वावच्छेदेनाकर्मकत्वप्रतीत्या LaS'abdeS'e. ii. 701. 13.

**अण्लक्षण** ( aṇ-lakṣaṇa ) *adj.* having the *taddhita* suffix *aṇ* as cause औपगवस्यापत्यं स्त्रीत्यत इञो लुकि कृतेऽनुपसर्जनाधिकारादणश्चार्थद्वारेणोपसर्जनत्वात्तदर्थस्य प्रत्ययार्थम्प्रति विशेषणत्वादण्लक्षण ईकारो न प्राप्नोतीत्यर्थ: Pradī. iv. 130A. 3 (*on* iv. 1. 93)

**अण्लोप** ( aṇ-lopa ) *m.* elision of the *taddhita* suffix *aṇ* सवितरीत्यत्राण्लोप: छान्दस: VīraMi. (Saṁskāra.) 282. 3.

**अण्व** ( áṇv-a ) *n.* **1** [AltGr. III. 319] (fine interstice in the) strainer (used for the Soma juice) सूरा अण्वं वि तन्वते ṚV. ix. 10. 5; क्रत्वा दक्षस्य रथ्यम् ··· । गोषामण्वेषु सश्चिम ṚV. ix. 16. 2 (Sāyaṇa अङ्गुलीषु); प्र ते धारा अत्यण्वानि मेष्य: ···यन्ति···सोम ṚV. ix. 86. 47; ix. 91. 3; ix. 107. 11; **2** field producing flax or *Panicum miliaceum* औमीनं तूमिनं तूम्यमण्वं चाणवि( ? वी )नं तथा ParyāS'aRa. 2. 416.

**अण्वधिष्ठान** ( aṇv-adhiṣṭhāna ) *n.* substratum of a *mantra* or sacred formula ततो भगवताक्रम्य तद्रूपवपुषा नयेत् । एकीभूयाण्वधिष्ठानमासिद्धेस्तत्त्ववर्त्मना MṛgendraT. ii. 4. 6.

**अण्वन्त** ( áṇv-anta ) *m.* subtle disputation, hair-splitting question or argument स होवाच जनको वैदेहो याज्ञवल्क्य किमर्थमचारी: पशूनिच्छन्नण्वन्तानिति S'atBr. XIV. vi. 10. 1; BṛĀraU. iv. 1. 1; आहो स्वित् अण्वन्तान् सूक्ष्मान्तान् सूक्ष्मवस्तुनिर्णयान्तान् प्रश्नान् मत्त: श्रोतुमिच्छन् (आगतोऽसि) BṛĀraUBh. 494. 10 (*on* iv. 1. 1); *adj.* ending with atom, up to atom तत्र हि क्रमिकाणां कपालादीनामण्वन्तानां सर्वेषां अतत्त्वता प्रतिपादिता GuruCan. i. 90. 2.

**अण्वन्तर** ( aṇv-antara ) *n.* **i** another quarter-mora द्वे अण्वन्तरेऽङ्गुष्ठस्य प्रदेशिन्यां तु षट् स्मृता: LomS'i. 5. 8; **ii** another atom अण्वन्तराभिमुख्येन तदेव यदि कल्प्यते । प्रचयो भूधरादीनाम् ··· न युज्यते TattvSaṁ. 1991; अणुवादिनोऽप्यणुरण्वन्तरेण संयुज्यमानो निरवयवत्वात् ··· अणुमात्रत्वप्रसङ्ग: BrahmSūBh.(S'aṅ.) 338. 1 (*on* ii. 1. 29); अणुरण्वन्तरं काले व्यतिक्रामति यावति GaṇiSāSaṁ. 0. 32; अणोरण्वन्तरसंगतस्य परिणतिरिव TattvPradī.(A.) 164. 1 (*on* 2. 24); 165. 1 (*on* 2. 24); अण्वन्तरादारम्भकसंयोगिन: अण्वन्तरे ··· अनारम्भककर्मसंचिन्तनात् Kiraṇā. 245. 15; 246. 16; अणोरण्वन्तरसंयोगेन द्व्यणुकापत्तिवत् वस्त्वन्तरसंयोगो वा VivaPraSaṁ. 260. 10; **iii** even a minutest point further यो जन: क्षणमध्यास्ते नैव जातु चलात्मक: । तस्याण्वन्तरमात्रेऽपि देशसंक्रान्त्यसंभव: TattvSaṁ. 697.

**अण्वपेक्ष** ( aṇv-apekṣa ) *adj.* considered or referred to in contrast with a minute or smaller object तदपेक्षयैव तु तत्र स्थूलज्ञानं स्यादिति चेन्न अण्वपेक्षत्वात् तस्य IṣṭaSi. 104. 6.

**अण्वर्थ** ( aṇv-artha ) *m.* (even a) small or subtle objective (of a human being) प्रयोक्त्र्यादिमहीप्रान्तमेतदण्वर्थसाधनम् MṛgendraT. i. 12. 32 (comm. पुमर्थसाधनम्)

**अण्ववयव** ( aṇv-avayava ) *m.* part or component of an atom अण्ववयवस्य चाणुतरत्वप्रसङ्गादणुकार्यप्रतिषेध: NyāyVār. 521. 10 (*on* iv. 2. 24)

**अण्ववस्था** ( aṇv-avasthā ) *f.* state of an atom क्षोणीयं क्षुद्यमाना